श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६४

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६४

*गोविन्दाभिषेकवर्णनं नन्दानयनवर्णनं च*

आलोक्य शैलोद्धरणादिरूपं
प्रभावमुच्चैस्तव गोपलोकाः।
विश्वेश्वरं त्वामभिमत्य विश्वे
नन्दं भवज्जातकमन्वपृच्छन्॥ १ ॥

गर्गोदितो निर्गदितो निजाय
वर्गाय तातेन तव प्रभावः।
पूर्वाधिकस्त्वय्यनुराग एषा-
मैधिष्ट तावत् बहुमानभारः॥ २ ॥

ततोऽवमानोदिततत्त्वबोधः
सुराधिराजः सह दिव्यगव्या।
उपेत्य तुष्टाव स नष्टगर्वः
स्पृष्ट्वा पदाब्जं मणिमौलिना ते॥ ३ ॥

स्नेहस्नुतैस्त्वां सुरभिः पयोभि-
र्गोविन्दनामाङ्कितमभ्यषिञ्चत्।
ऐरावतोपाहृतदिव्यगङ्गा-
पाथोभिरिन्द्रोऽपि च जातहर्षः॥ ४ ॥

जगत्त्रयेशे त्वयि गोकुलेशे
तथाऽभिषिक्ते सति गोपवाटः।
नाकेऽपि वैकुण्ठपदेऽप्यलभ्यां
श्रियं प्रपेदे भवतः प्रभावात्॥ ५ ॥

www.prapatti.com

कदाचिदन्तर्यमुनं प्रभाते
　　स्नायन् पिता वारुणपूरुषेण।
नीतस्तमानेतुमगाः पुरीं त्वं
　　तां वारुणीं कारणमर्त्यरूपः॥ ६ ॥

ससम्भ्रमं तेन जलाधिपेन
　　प्रपूजितस्त्वं प्रतिगृह्य तातम्।
उपागतस्तत्क्षणमात्मगेहं
　　पिताऽवदत्तच्चरितं निजेभ्यः॥ ७ ॥

हरिं विनिश्चित्य भवन्तमेतान्
　　भवत्पदालोकनबद्धतृष्णान्।
निरीक्ष्य विष्णो परमं पदं तद्-
　　दुरापमन्यैस्त्वमदीदृशस्तान्॥ ८ ॥

स्फुरत्परानन्दरसप्रवाह-
　　प्रपूर्णकैवल्यमहापयोधौ।
चिरं निमग्नाः खलु गोपसङ्घा-
　　स्त्वयैव भूमन् पुनरुद्धृतास्ते॥ ९ ॥

करबदरवदेवं देव कुत्रावतारे
　　निजपदमनवाप्यं दर्शितं भक्तिभाजाम्।
तदिह पशुपरूपी त्वं हि साक्षात् परात्मा
　　पवनपुरनिवासिन् पाहि मामामयेभ्यः॥ १० ॥

**********

www.prapatti.com